विमानस्थानम्

प्रथमोऽध्यायः

अथातो रसविमानं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

समसर्वरसोपयोगगुणाः

शरीरं धारयन्तीह षड्रसाः सममाहृताः

वैषम्ये दोषः

अतोऽन्यथा विकारांस्तु जनयन्ति शरीरिणाम् १

रसानां दोषाणां च गुणाः

रूक्षो लघुः स्थिरश्शीतः कषायस्तिक्त एव च
तीक्ष्णोष्णावम्ललवणौ कटुर्वापि विकाश्यथ २
शीतः स्निग्धो गुरुर्बल्यः पिच्छिलो मधुरो रसः
कषायतिक्तकटुकः शीतो रूक्षोऽनिलः स्मृतः ३
रूक्षोष्णमम्लं पित्तन्तु कटुकं च प्रचक्षते
श्लेष्मा तु मधुरः स्निग्धः शीतो मन्दः स्थिरो गुरुः ४
इत्येतान् रसदोषाणां सहोत्पन्नान् गुणान्विदुः

दोषानुरूपा रसगुणाः

तत्र वायुगुणैस्तुल्यान्कषायकटुतिक्तकान् ५
कट्वम्ललवणैस्तुल्यांस्तथा पित्तगुणान्विदुः
मधुरं लवणाम्लौ च विद्यात्कफसमान् रसान् ६

रसप्रभावः

तस्मादभ्यस्यमानैस्तैः श्लेष्मा देहे प्रवर्धते

रसानां प्रभावद्वैविध्यम्

अत्रैकत्र कृतो राशिर्द्विर्महत्वमिहर्च्छति ७

गुणसाम्याद्विवर्धन्ते यथास्वं धातवो नृणाम्
रसैस्तद्विपरीतैश्च यान्त्येते क्षयमाहृतैः ८
यथोदकं समासाद्य शान्तिं गच्छति पावकः

वातादिवर्धनक्षपणरसाः

कषायतिक्तकटुकै रूक्षो रूक्षैर्विवर्धते ९
मारुतः स्निग्धभावैश्च ततोऽन्यैरुपशाम्यति
कट्वम्ललवणैः पित्तमुष्णमुष्णैर्विवर्धते १०
शीतैश्शाम्यति शेषैस्तु गुणानां हि विशेषतः
स्निग्धः स्निग्धैः कफश्चापि वर्धते मधुरादिभिः ११
रसैः शाम्यति रूक्षैश्च कषायकटुतिक्तकैः
एकैकमेकसामान्याद्वर्धयन्ति त्रयस्त्रयः १२
घ्नन्ति चान्यगुणत्वेन रसा दोषं शरीरिणाम्

तैलादीनां वातादिविजये युक्तिः

न वायुस्सह तैलेन स्नेहौष्ण्याद्व्यपलीयते १३
शीतत्वान्मधुरत्वाच्च न पित्तं सह सर्पिषा
रौक्ष्यात्कषायभावाच्च स्निग्धो मधुर एव च १४
न श्लेष्मा मधुना सार्धं देहे पर्यवतिष्ठते
आनूपमांसजा वापि वसा मज्जान एव च १५
तैलवन्मारुतं घ्नन्ति स्नेहौष्ण्यगुरुभावतः
शाकादविष्किराणां च रसा मज्जान एव च १६
घृतवद् घ्नन्ति ते पित्तं शीतमाधुर्यभावतः
कषायतिक्तकटुकं यच्च किञ्चिदिहौषधम् १७
मधुरं तत्कफं हन्ति गुणान्यत्वेन देहिनाम्

पिप्पल्यादित्रयोपयोगे विशेषः

अथ नात्युपयुञ्जीत पिप्पलीं क्षारमेव च १८
लवणं चैव बह्वेतद् भुक्तं दोषाय कल्पते
श्लेष्माणं च्यावयित्वा तु नोत्सहेतापकर्षितुम् १९
पिप्पली पाकमधुरा तस्मात्तां नातिभक्षयेत्
अत्याहृता पचेद्देहं तीक्ष्णोष्णकटुभावतः २०
क्षारं च लवणं चैव भोक्तुं नेहेत केवलम्

भोजने नियमास्तत्प्रयोजनं च

मात्रावदुष्णं स्निग्धं च सात्म्यं स्वादु च भोजनम् २१
अविदाहि च यत् पाके जीर्णे तदुपयोजयेत्
बलवर्णकरं स्निग्धमुष्णं श्लेष्मानिलापहम् २२
विदह्यते न मात्रा च सात्म्यतां च करोत्यथ
स्वादु पुष्टिकरं जन्तोरविदाहि प्रसादनम् २३
नृणामायुष्करं चैव जीर्णे भोजनमिष्यते
न जल्पन्न हसंश्चापि न द्रुतं न विलम्बितम् २४
भुञ्जीताभ्यादृतः स्निग्धं देहे निर्वर्तते रसः

रसाद्युपचयप्रतिपादनम्

यथेह वैद्युतो वह्निः प्रवर्तेत सुदारुणि २५
पच्यमाने तथा भुक्ते रसादिरुपचीयते

वर्षादिगुणाः

जीवयन्ति परं वर्षा हेमन्तः पाययत्यपि २६
ग्रीष्मः पचति चाप्येनं परिणाम इवापरः
भृशमौष्ण्यात्कटुर्ग्रीष्मः सर्वधातुविशोषणः २७
धैर्यस्थैर्यकरं शीतं वर्षामद्यब ---
इत्याह भगवानात्रेयः

इति भेले विमाने द्वितीयोऽध्यायः

तृतीयोऽध्यायः

दुर्बलाग्निः

यस्य भुक्तं विपच्यते
भुञ्जानस्यापि चान्नानि बलं वर्णश्च हीयते १
अल्पं लघ्वपि यच्चान्नं भुक्तं दुःखेन जीर्यति
नाप्नोति बलवर्णौ च दुर्बलाग्निः स उच्यते २

विषमाग्निः

कदाचित्पच्यते भुक्तं कदाचिन्न विपच्यते
गुरु वा लघु वा यस्य विषमाग्निः स उच्यते २

समाग्निः

मितं पच्येत यस्यान्नमतिभुक्तं न पच्यते
समाग्निं तं नरं विद्यात्समपित्तकफानिलम् ३

दोषानुसारेणाग्नयः

नरो भवति तीक्ष्णाग्निः प्रकृत्या वातपैत्तिकः
वातिको विषमाग्निश्च मन्दाग्निश्च कफान्नरः ४

हीनाधिकाग्निदोषः

यस्य हीनाधिकस्त्वग्निः क्षिप्रं देहं स मुञ्चति

समाग्निगुणः

समाग्निश्च समात्मा यः स दीर्घायुष्ट्वमृच्छति ६

अत्यग्निप्रतिभोजनम्

गव्यमाहिषवाराहैः कुलीरैर्मत्स्यकर्कटैः

मांसैस्सपललैः स्निग्धैरत्यग्निं प्रतिभोजयेत् ७
गोधानिष्क्वथिते क्षीरे सिद्धं भुञ्जीत पायसम्
पिबेद्दधि ससर्पिष्कं माषसूपेन मिश्रितम् ८
तथा पललसम्मिश्रं कच्छपाराडरसं पिबेत्
गुडं च तैलसम्मिश्रं कुर्यादन्यच्च तद्धितम् ९

विषमाग्निचिकित्सा

स्निग्धस्य विषमाग्नेस्तु वमनादीनि कारयेत्

मन्दाग्निचिकित्सा

ग्रहणीदूषणीयोक्तं मन्दाग्नेस्तु चिकित्सितम् १०

त्रिविधं भेषजम्

अन्तरौषधपानानि बहिर्लेपे च या क्रिया
शस्त्रकर्मविधानं च भेषजं त्रिविधं स्मृतम् ११

त्रयः पाकाः

मधुरोऽम्लः कटुश्चैव पक्तिमार्गास्त्रयः स्मृताः
कटुर्भवति पक्वस्य पच्यमानस्य चेतरौ १२

वातजविकारोपक्रमः

इहान्नपानं भोज्यं च मधुराम्लं प्रचक्षते
वातजेषु विकारेषु यदा वा तैर्न शाम्यति १३
दद्यादथास्मै स्निग्धाय भिषक् स्नेहविरेचनम्
बस्तिभिर्वा चिकित्सेत ह्यधोभागे च मारुतः १४

पित्तजविकारोपक्रमः

तथा च तिक्तमधुरं पानमन्नं प्रदापयेत्
पैत्तिकेषु विकारेषु यदि वा तन्न शाम्यति १५

कफजविकारोपक्रमः

तस्य स्निग्धस्य वमनं शिरसश्च विरेचनम्
कुर्याद्यथाबलं श्लेष्मा ह्यूर्ध्वभागप्रकीर्तितः १६

देहनिबन्धनानि

शकृन्मूत्रानिलाश्चैव रक्तमांसादयश्च षट्
विद्यान्निबन्धनानीति तानि देहेषु देहिनाम् १७

बलादित्रैविध्यम्

बलं वयः शरीरं च प्रत्येकं त्रिविधं स्मृतम्
उत्तमाधममध्यं तु भेदेनाथ निशामयेत् १८

सात्म्यलक्षणम्

आहारश्च विहारश्च सेव्यमानौ क्रमेण तु
कालेन प्रकृतिं यातस्तदाहुः सात्म्यलक्षणम् १९
इत्याह भगवानात्रेयः

इति भेले विमाने तृतीयोऽध्यायः

चतुर्थोऽध्यायः

अथातो रोगप्रकृतिविनिश्चयं व्याख्यास्याम इति ह स्माह भगवानात्रेयः
प्रमृश्य दृष्ट्वा पृष्ट्वा च परीक्षेतातुरं भिषक्
पूर्वं तु रोगविज्ञानं ततः पश्चाच्चिकित्सितम् १
रूपं छायामुपचयं प्राग्व्याधेर्व्याधितस्य च
दृष्ट्वा भिषक् परीक्षेत प्राकृतं वैकृतं तथा २
ज्वरस्य साम्यं वैषम्यं गात्रं वा श्लक्ष्णकर्कशम्
दृष्ट्वा स्पृष्ट्वावगच्छेद्धि शैत्यमौष्ण्यं च पाणिना ३

मातापितृसमाचारं सात्म्यं गर्भेण दौहृदम्
व्याधिकालपरीणामं शकृन्मूत्रविवर्णताम् ४
पूर्वरूपसमुत्थानं शरीराग्निवयोबलम्
प्रकृतिं जन्मदेशं च भोजनं च यथोचितम् ५
व्यायामनिष्ठासात्म्यं च मात्रामात्रे च भोजने
प्रश्नोक्तानि विजानीयाद्यदन्यदपि तद्विधम् ६

प्रकृतिपरिचयः

केचिदिच्छन्ति मुनयो दोषमेकमिहाधिकम्
विकारस्याविशिष्टत्वादनिष्टं कारणं च तत् ७
रूक्षासहो नरो यस्तु स वातप्रकृतिः स्मृतः
पैत्तिकोऽम्बुसहश्चापि मधुराम्लासहः कफात् ८
स्वभावप्रभवो ह्येष सहोत्पन्नो गुणागमः
प्रकृतिं वै विजानीयात्तस्य वक्ष्यामि लक्षणम् ९

पराः प्रकृतयः

अव्यक्तं च महांश्चैव महाभूतानि पञ्च च
पराः प्रकृतयस्सप्त स्वभावः काल एव च १०
तेभ्यो भवन्ति भूतानि तान्येव प्रतियान्ति च
इन्द्रियाणीन्द्रियार्थाश्च बुद्धयः पञ्च तास्तथा ११

वातप्रकृतिनिष्पत्तिः

ऋतुकाले यदा नारी रूक्षाण्यन्नानि सेवते
उदावर्ते तथापीह कर्म चातिनिषेवते १२
तदैवं वातसन्दुष्टं रक्तं गर्भाशयस्थितम्
तद्विधेनैव शुक्लेन यदा योगमुपैति वै १३
तदा वातप्रदुष्टेन शुक्लेन रुधिरेण च

वातप्रकृतितामेति गर्भः प्रागात्मनः स वै १४

कफपैत्तिकप्रकृतिनिष्पत्तिः

एवमेवर्तुकाले वै भजन्त्याः कफपैत्तिकम्
श्लैष्मिकी पैत्तिकी चापि प्रकृतिर्जायते ततः १५

वातप्रकृतिलक्षणम्

ह्रस्वः शीघ्रः कृशश्चाणुः प्रलापी परुषप्रियः
स्तब्धाङ्गो विषमश्लिष्टो गणरूपे गणे धृतिः १६
सहः क्लेशस्य विस्रम्भी रूक्षत्वगनवस्थितः
खरमूर्धजरोमाङ्गः क्षिप्रग्राही तथा स्मृतः १७
स्वप्नेषु चोष्ट्रेणायाति वियत्यपि तु गच्छति
यस्योपशेते सुस्निग्धं स वातप्रकृतिर्नरः १८

पित्तप्रकृतिलक्षणम्

शिथिलाङ्गोऽगरुगन्धश्चण्डः शीघ्रो महाशनः
वलीपलितखालित्यशीघ्रपाकी तथाक्षमः १९
वृत्ताक्षः क्रोधनो यश्च दुर्बलो दुर्बलेन्द्रियः
नाम्लाशः शीतशीताशी दुष्प्रजाः शीतलप्रियः २०
अतिवर्णोऽतिमेधावी स्वप्ने पावकदृक् तथा
शीघ्रमावाति यः स्नातः पैत्तिकप्रकृतिर्नरः २१

श्लेष्मप्रकृतिलक्षणम्

सुस्निग्धः श्लक्ष्णबद्धाङ्गः सुभगः प्रियदर्शनः
दृढस्मृतिश्चिरग्राही दृढभक्तिपरायणः २२
प्रियमांसोष्णकटुकः प्रिययोषिद्बहुप्रजः
क्षमावान् बलवान् धन्यः शीतालुरशनप्रियः २३
चिराद् दृढव्याधिरथो मितवागल्पभुक् स्मृतः

दीर्घदर्शी महोत्साहो धीरः क्लेशसहस्तथा २४
रोमदन्तनखैः केशैर्बहुलैर्यस्सुबन्धनैः
चिरादावाति च स्नातः स्वप्ने पश्यति चोदकम् २५
यस्तु रूक्षं तु सहते स श्लेष्मप्रकृतिर्नरः

संसृष्टप्रकृतिलक्षणम्

संसृष्टप्रकृतिं विद्यात्संसृष्टैश्चापि लक्षणैः २६

प्रवरमध्यमजघन्यप्रकृतयः

निवृत्ता प्रकृतिर्धन्या द्वन्द्वा भवति मध्यमा
सन्निपातात्मिका या तु जघन्या सा प्रकीर्तिता २७
इत्याह भगवानात्रेयः

इति भेले चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

अथातो व्याधितरूपीयं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

गुरुव्याधितलघुव्याधितौ

गुरुव्याधिर्नरः कश्चिन्मूर्त्या चैव बलेन च
लघुव्याधिः नरस्त्वन्यः सत्त्वादिभिरनन्वितः १
गुरुव्याधिरिवाभाति भिषक् तत्र प्रमुह्यति

गुरुब्याधितस्य लघुव्याधितचिकित्साकरणजव्यापत्तिः

तत्राल्पमात्रं भैषज्यं सेवितं गुरुरोगिणाम् २
न निर्दहत्यतः सर्वान्दोषानल्पेन तेजसा
मूर्छा छर्दिस्तिमितता जृम्भा च गुरुगात्रता ३
तृष्णा सन्ततभावश्च भवन्त्येतानि तस्य तु

तत्र परिहारः

मुस्ता कुष्ठं हरिद्रे द्वे प्रग्रहातिविषाभयाः ४
भल्लातकं वयस्था च चित्रकः सुरदारु च
एतैरास्थापनं तच्च कुर्याद् गोमूत्रसंयुतैः ५
पूर्णादिष्टानदिष्टांश्च तथा शान्तिं नियच्छति
आरग्वधं सप्तपर्णं मदनं स्वादुकण्टकम् ६
शार्ङ्गेष्टां कटुकां पाठां नक्तमालं सवत्सकम्
एतदारग्वधार्थं तु कुर्यादास्थापनं भिषक् ७
इत्याह भगवानात्रेयः

इति भेले पञ्चमोऽध्यायः

षष्ठोऽध्यायः

अथात ऋतुविमानं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

ऋतुपरिवृत्त्या धातुक्षयवृद्धी

आदित्यगतिवैशेष्यादृतूनां परिवर्तनात्
क्षयं वृद्धिं च गच्छन्ति यथास्वं धातवो नृणाम् १

वर्षर्तुचर्या

भूमिबाष्पात्पुरोवाताद्घनच्छायाप्रसङ्गतः
महीकलुषसन्दुष्टात्पीयमानान्नवोदकात् २
ग्रैष्मिकात्कृशभावाच्च प्राणे दुर्ब्बलतां गते
वर्षासु देहिनामग्निर्मृदुत्वमुपगच्छति ३
ततो विष्टम्भजो वायुर्यस्माद्धीतः प्रकुप्यति
तन्न सेवेत वर्षासु कट्वम्ललवणान् रसान् ४
मुद्गयूषेण वाश्नीयात्पुराणान् शालिषष्टिकान्

अथवा यवगोधूमं सृष्टवाते हितं स्मृतम् ५
पटोलानि च तक्रं च जाङ्गलांश्च रसान् लघून्
कौपं दिव्यं जलं सिद्धं भजेदास्थापनानि च ६

शरच्चर्या

असंस्थितत्वाद्वर्षासु जलमम्लं विपच्यते
तस्माद्विवर्धते पित्तं यथाम्लैश्च तथाशनैः ७
सूर्योपतापात्सहसा गत्वा चैवौषधीकृतम्
वर्षासु निचयं पित्तं कोपं शरदि गच्छति ८
स्नानानुलेपनं तस्माच्छीतं शरदि कारयेत्
वीजयेत्तालवृन्तैश्च विगाहेत सरस्सु च ९
लाजसक्तुं पिबेच्चापि शर्करामधुवारिभिः
मुद्गयूषेण चाश्नीयात्पुराणान् शालिषष्टिकान् १०
रसान् मधुरकांश्चापि जाङ्गलान् सर्पिषा कृतान्
विदारीक्षुरसं द्राक्षां सेवेतान्यच्च तद्विधम् ११
गतपित्तप्रवेगश्च शरत्काले घृतं पिबेत्
तथास्याप्याय्यते देहः शेषा दोषाश्च यान्त्यधः १२

हेमन्तचर्या

पश्चाद्वातस्य रूक्षत्वाच्छीतलत्वादृतोस्तथा
हेमन्तेन निगच्छन्ति खरत्वं धातवो नृणाम् १३
तस्मात्स्नेहं बहुविधं स्नानं चोष्णेन वारिणा
भजेत्खरत्वपारुष्ये तथाभ्यङ्गात्प्रशाम्यति १४
शकुनानौदकान्मत्स्यान् स्नेहाम्ललवणान्वितान्
आनूपानि च मांसानि सेवेतान्यच्च तद्विधम् १५
कटुर्हि पश्चिमो वायुः शैत्यं तीव्रं च वारिणः

अत्यर्थं रूक्षयेद्वायुः शरीरं रूक्षभोजनात् १६
गुरुप्रावरणश्च स्यादातपाग्नी च संश्रयेत्
रूक्षे हि तेजसा जन्तोः शरीराद्ध्रियते बलम् १७
आपो हि शीतमधुरा हेमन्ते तु भवन्त्यथ
तस्मात्कफस्तथा ताभिः स्निग्धैरन्नैश्च चीयते १८

शिशिरचर्या

शीतलत्वादृतोश्चापि न तावत्परिभिद्यते
तस्मात्तैलगुडोपेतां वारुणीं शिशिरे पिबेत् १९
विविधानि च मांसानि भक्षयेच्च प्रकारतः

वसन्तचर्या

एवं तु निचितः श्लेष्मा शीतत्वादिह देहिनाम् २०
द्रवतामेति संस्पृष्टो वसन्ते सूर्यतेजसा
रविर्हि मध्यमां काष्ठां वसन्ते प्रतिपद्यते २१
दह्यतामिव शैलानां नृणामङ्गे प्रकुप्यति
ततः श्लेष्मा द्रवीभूतो हृदयं व्यपलिम्पति २२
तस्माच्छर्द्यविपाकौ च दृश्येते शिशिरात्यये
तस्माद्वसन्ते श्लेष्मघ्नं मधुमार्द्वीकमीरितम् २३

इति भेले षष्ठोऽध्यायः

इति भेलसंहितायां विमानस्थानम् समाप्तम्